# Shivatandavastotra by Ravana

# શ્રીશિવતાણ્ડવસ્તોત્રમ્ રાવણરચિતમ્

## Document Information

Text title : shivaTANDava stotra

File name : shivtAND.itx

Category : shiva, stotra

Location : doc_shiva

Author : Ravana

Transliterated by : Girish Beeharry and Sushil D. Sharma sushil at synopsys.com

Proofread by : Girish Beeharry and Sushil D. Sharma

Description-comments : Extended version with 17 verses

Latest update : February 16, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીશિવતાણ્ડવસ્તોત્રમ્ રાવણરચિતમ્

॥ અથ રાવણકૃતશિવતાણ્ડવસ્તોત્રમ્ ॥

॥ શ્રીગણેશાય નમઃ ॥

જટાટવીગલજ્જલપ્રવાહપાવિતસ્થલે
ગલેઽવલમ્બ્ય લમ્બિતાં ભુજઙ્ગતુઙ્ગમાલિકામ્ ।
ડમડ્ડમડ્ડમડ્ડમન્નિનાદવડ્ડમર્વયં
ચકાર ચણ્ડતાણ્ડવં તનોતુ નઃ શિવઃ શિવમ્ ॥ ૧॥

જટાકટાહસમ્ભ્રમભ્રમન્નિલિમ્પનિર્ઝરી-
-વિલોલવીચિવલ્લરીવિરાજમાનમૂર્ધનિ ।
ધગદ્ધગદ્ધગજ્જ્વલલ્લલાટપટ્ટપાવકે
કિશોરચન્દ્રશેખરે રતિઃ પ્રતિક્ષણં મમ ॥ ૨॥

ધરાધરેન્દ્રનન્દિનીવિલાસબન્ધુબન્ધુર
સ્ફુરદ્દિગન્તસન્તતિપ્રમોદમાનમાનસે ।
કૃપાકટાક્ષધોરણીનિરુદ્ધદુર્ધરાપદિ
ક્વચિદ્દિગમ્બરે(ક્વચિચ્ચિદમ્બરે) મનો વિનોદમેતુ વસ્તુનિ ॥ ૩॥

જટાભુજઙ્ગપિઙ્ગલસ્ફુરત્ફણામણિપ્રભા
કદમ્બકુઙ્કુમદ્રવપ્રલિપ્તદિગ્વધૂમુખે ।
મદાન્ધસિન્ધુરસ્ફુરત્ત્વગુત્તરીયમેદુરે
મનો વિનોદમદ્ભુતં બિભર્તુ ભૂતભર્તરિ ॥ ૪॥

સહસ્રલોચનપ્રભૃત્યશેષલેખશેખર
પ્રસૂનધૂલિધોરણી વિધૂસરાઙ્ઘ્રિપીઠભૂઃ ।
ભુજઙ્ગરાજમાલયા નિબદ્ધજાટજૂટક
શ્રિયૈ ચિરાય જાયતાં ચકોરબન્ધુશેખરઃ ॥ ૫॥

લલાટચત્વરજ્વલદ્ધનઞ્જયસ્ફુલિઙ્ગભા-

-નિપીતપઞ્ચસાયકં નમન્નિલિમ્પનાયકમ્ ।
સુધામયૂખલેખયા વિરાજમાનશેખરં
મહાકપાલિસમ્પદેશિરોજટાલમસ્તુ નઃ ॥ ૬॥

કરાલભાલપટ્ટિકાધગદ્ધગદ્ધગજ્જ્વલ-
દ્ધનઞ્જયાહુતીકૃતપ્રચણ્ડપઞ્ચસાયકે ।
ધરાધરેન્દ્રનન્દિનીકુચાગ્રચિત્રપત્રક-
-પ્રકલ્પનૈકશિલ્પિનિ ત્રિલોચને રતિર્મમ ॥ ૭॥

નવીનમેઘમણ્ડલી નિરુદ્ધદુર્ધરસ્ફુરત્-
કુહૂનિશીથિનીતમઃ પ્રબન્ધબદ્ધકન્ધરઃ ।
નિલિમ્પનિર્ઝરીધરસ્તનોતુ કૃત્તિસિન્ધુરઃ
કલાનિધાનબન્ધુરઃ શ્રિયં જગદ્ધુરન્ધરઃ ॥ ૮॥

પ્રફુલ્લનીલપઙ્કજપ્રપઞ્ચકાલિમપ્રભા-
-વલમ્બિકણ્ઠકન્દલીરુચિપ્રબદ્ધકન્ધરમ્ ।
સ્મરચ્છિદં પુરચ્છિદં ભવચ્છિદં મખચ્છિદં
ગજચ્છિદાન્ધકચ્છિદં તમન્તકચ્છિદં ભજે ॥ ૯॥

અખર્વ(અગર્વ)સર્વમઙ્ગલાકલાકદમ્બમઞ્જરી
રસપ્રવાહમાધુરી વિજૃમ્ભણામધુવ્રતમ્ ।
સ્મરાન્તકં પુરાન્તકં ભવાન્તકં મખાન્તકં
ગજાન્તકાન્ધકાન્તકં તમન્તકાન્તકં ભજે ॥ ૧૦॥

જયત્વદભ્રવિભ્રમભ્રમદ્ભુજઙ્ગમશ્વસ-
-દ્વિનિર્ગમત્ક્રમસ્ફુરત્કરાલભાલહવ્યવાટ્ ।
ધિમિદ્ધિમિદ્ધિમિધ્વનન્મૃદઙ્ગતુઙ્ગમઙ્ગલ
ધ્વનિક્રમપ્રવર્તિત પ્રચણ્ડતાણ્ડવઃ શિવઃ ॥ ૧૧॥

દૃષદ્વિચિત્રતલ્પયોર્ભુજઙ્ગમૌક્તિકસ્રજોર્-
-ગરિષ્ઠરત્નલોષ્ઠયોઃ સુહૃદ્વિપક્ષપક્ષયોઃ ।
તૃણારવિન્દચક્ષુષોઃ પ્રજામહીમહેન્દ્રયોઃ
સમં પ્રવર્તયન્મનઃ કદા સદાશિવં ભજે ॥ ૧૨॥

કદા નિલિમ્પનિર્ઝરીનિકુઞ્જકોટરે વસન્
વિમુક્તદુર્મતિઃ સદા શિરઃ સ્થમઞ્જલિં વહન્ ।
વિમુક્તલોલલોચનો લલામભાલલગ્નકઃ

શિવેતિ મન્ત્રમુચ્ચરન્ કદા સુખી ભવામ્યહમ્ ॥ ૧૩॥

નિલિમ્પનાથનાગરીકદમ્બમૌલમલ્લિકા-
નિગુમ્ફનિર્ભરક્ષરન્મધૂષ્ણિકામનોહરઃ ।
તનોતુ નો મનોમુદં વિનોદિનીમહર્નિશં
પરશ્રિયઃ પરં પદંતદઙ્ગજત્વિષાં ચયઃ ॥ ૧૪॥

પ્રચણ્ડવાડવાનલપ્રભાશુભપ્રચારણી
મહાષ્ટસિદ્ધિકામિનીજનાવહૂતજલ્પના ।
વિમુક્તવામલોચનાવિવાહકાલિકધ્વનિઃ
શિવેતિ મન્ત્રભૂષણા જગજ્જયાય જાયતામ્ ॥ ૧૫॥

ઇદમ્ હિ નિત્યમેવમુક્તમુત્તમોત્તમં સ્તવં
પઠન્સ્મરન્બ્રુવન્નરો વિશુદ્ધિમેતિસન્તતમ્ ।
હરે ગુરૌ સુભક્તિમાશુ યાતિ નાન્યથા ગતિં
વિમોહનં હિ દેહિનાં સુશઙ્કરસ્ય ચિન્તનમ્ ॥ ૧૬॥

પૂજાવસાનસમયે દશવક્ત્રગીતં
યઃ શમ્ભુપૂજનપરં પઠતિ પ્રદોષે ।
તસ્ય સ્થિરાં રથગજેન્દ્રતુરઙ્ગયુક્તાં
લક્ષ્મીં સદૈવ સુમુખિં પ્રદદાતિ શમ્ભુઃ ॥ ૧૭॥

॥ ઇતિ શ્રીરાવણવિરચિતં શિવતાણ્ડવસ્તોત્રં સમ્પૂર્ણમ્ ॥

The stotra is in panchachAmara Chanda, in which there are 16 varna-s per line, each line begins with a laghu and the laghu and guru varna-s alternate. So there are eight LG (laghu-guru) pairs, making up 16 syllables of each line. The last shloka is in Vasanta-tilakA metre. Some of the versions of the stotra carry 15-19 verses.

There are two additional verses seen in some version
નમામિ પાર્વતીપતિં નમામિ જાહ્નવીપતિં
નમામિ ભક્તવત્સલં નમામિ ભાલલોચનમ્ ।
નમામિ ચન્દ્રશેખરં નમામિ દુઃખમોચનં
તદીયપાદપઙ્કજં સ્મરામ્યહં નટેશ્વરમ્ ॥ ૧૬॥

રાવણેન કૃતં સ્તોત્રં યઃ પઠેચ્છિવસન્નિધૌ ।
પુત્રપૌત્રાદિકં સૌખ્યં લભતે મોક્ષમેવ ચ ॥ ૧૯॥

ઇતિ દશકન્ધરવિરચિતં શિવતાણ્ડવસ્તોત્રં સમાપ્તમ્ ।

Also there are variations, for example, the last line
of verse 12 is also chanted as
સમપ્રવૃત્તિકઃ કદા સદાશિવં ભજામ્યહમ્ ॥ ૧૨॥ or in 13
વિલોલલોલલોચનો instead of વિમુક્તલોલલોચનો
Both alternatives are correct and there is no need to
document all kinds of variations seen in different prints.

---

*Shivatandavastotra by Ravana*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*